# ॥ वाल्मीकि रामायण ॥

## ५ सुन्दरकाण्ड

### अध्याय २५

इत्युक्ताः सीतया घोरं राक्षस्यः क्रोधमूर्छिताः ।
काश्चिज्जग्मुस्तदाख्यातुं रावणस्य तरस्विनः ॥ १ ॥

ततः सीतामुपागम्य राक्षस्यो घोरदर्शनाः ।
पुनः परुषमेकार्थमनर्थार्थमथाब्रुवन् ॥ २ ॥

हन्तेदानीं तवानार्ये सीते पापविनिश्चये ।
राक्षस्यो भक्षयिष्यन्ति मांसमेतद्यथासुखम् ॥ ३ ॥

सीतां ताभिरनार्याभिर्दृष्ट्वा सन्तर्जितां तदा ।
राक्षसी त्रिजटावृद्धा शयाना वाक्यमब्रवीत् ॥ ४ ॥

आत्मानं खादतानार्या न सीतां भक्षयिष्यथ ।
जनकस्य सुतामिष्टां स्नुषां दशरथस्य च ॥ ५ ॥

स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ।
राक्षसानामभावाय भर्तुरस्या भवाय च ॥ ६ ॥

एवमुक्तास्त्रिजटया राक्षस्यः क्रोधमूर्छिताः ।
सर्वा एवाब्रुवन्भीतास्त्रिजटां तामिदं वचः ॥ ७ ॥

कथयस्व त्वया दृष्टः स्वप्नेऽयं कीदृशो निशि ॥ ८ ॥

तासां श्रुत्वा तु वचनं राक्षसीनां मुखोद्गतम् ।
उवाच वचनं काले त्रिजटास्वप्नसंश्रितम् ॥ ९ ॥

गजदन्तमयीं दिव्यां शिबिकामन्तरिक्षगाम् ।
युक्तां वाजिसहस्रेण स्वयमास्थाय राघवः ॥ १० ॥

स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरावृता ।
सागरेण परिक्षिप्तं श्वेतपर्वतमास्थिता ।
रामेण सङ्गता सीता भास्करेण प्रभा यथा ॥ ११ ॥

राघवश्च मया दृष्टश्चतुर्दन्तं महागजम् ।
आरूढः शैलसङ्काशं चचार सहलक्ष्मणः ॥ १२ ॥

ततस्तौ नरशार्दूलौ दीप्यमानौ स्वतेजसा ।
शुक्लमाल्याम्बरधरौ जानकीं पर्युपस्थितौ ॥ १३ ॥

ततस्तस्य नगस्याग्रे आकाशस्थस्य दन्तिनः ।
भर्त्रा परिगृहीतस्य जानकी स्कन्धमाश्रिता ॥ १४ ॥

भर्तुरङ्कात्समुत्पत्य ततः कमललोचना ।
चन्द्रसूर्यौ मया दृष्टा पाणिभ्यां परिमार्जती ॥ १५ ॥

ततस्ताभ्यां कुमाराभ्यामास्थितः स गजोत्तमः ।
सीतया च विशालाक्ष्या लङ्काया उपरि स्थितः ॥ १६ ॥

पाण्डुरर्षभयुक्तेन रथेनाष्टयुजा स्वयम् ।
शुक्लमाल्याम्बरधरो लक्ष्मणेन समागतः ।
लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ १७ ॥

विमानात्पुष्पकादद्य रावणः पतितो भुवि ।
कृष्यपाणः स्त्रिया दृष्टो मुण्डः कृष्णाम्बरः पुनः ॥ १८ ॥

रथेन खरयुक्तेन रक्तमाल्यानुलेपनः ।
प्रयातो दक्षिणामाशां प्रविष्टः कर्दमं ह्रदम् ॥ १९ ॥

कण्ठे बद्ध्वा दशग्रीवं प्रमदा रक्तवासिनी ।
काली कर्दमलिप्ताङ्गी दिशं याम्यां प्रकर्षति ॥ २० ॥

वराहेण दशग्रीवः शिंशुमारेण चेन्द्रजित् ।
उष्ट्रेण कुम्भकर्णश्च प्रयातो दक्षिणां दिशम् ॥ २१ ॥

समाजश्च महान्वृत्तो गीतवादित्रनिःस्वनः ।
पिबतां रक्तमाल्यानां रक्षसां रक्तवाससाम् ॥ २२ ॥

लङ्का चेयं पुरी रम्या सवाजिरथसङ्कुला ।
सागरे पतिता दृष्टा भग्नगोपुरतोरणा ॥ २३ ॥

पीत्व तैलं प्रनृत्ताश्च प्रहसन्त्यो महास्वनाः ।
लङ्कायां भस्मरूक्षायां सर्वा राक्षसयोषितः ॥ २४ ॥

कुम्भकर्णादयश्चेमे सर्वे राक्षसपुङ्गवाः ।
रक्तं निवसनं गृह्य प्रविष्टा गोमयह्रदे ॥ २५ ॥

अपगच्छत नश्यध्वं सीतामाप्नोति राघवः ।
घातयेत्परमामर्षी सर्वैः सार्धं हि राक्षसैः ॥ २६ ॥

प्रियां बहुमतां भार्यां वनवासमनुव्रताम् ।
भर्त्सितां तर्जितां वापि नानुमंस्यति राघवः ॥ २७ ॥

तदलं क्रूरवाक्यैर्वः सान्त्वमेवाभिधीयताम् ।
अभियाचाम वैदेहीम् एतद्धि मम रोचते ॥ २८ ॥

यस्या ह्येवं विधः स्वप्नो दुःखितायाः प्रदृश्यते ।
सा दुःखैर्बहुभिर्मुक्ता प्रियं प्राप्नोत्यनुत्तमम् ॥ २९ ॥

भर्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया ।
राघवाद्धि भयं घोरं राक्षसानाम् उपस्थितम् ॥ ३० ॥

प्रणिपात प्रसन्ना हि मैथिली जनकात्मजा ।
अलमेषा परित्रातुं राक्षस्यो महतो भयात् ॥ ३१ ॥

अपि चास्या विशालाक्ष्या न किंचिदुपलक्षये ।
विरुद्धमपि चाङ्गेषु सुसूक्ष्ममपि लक्ष्मणम् ॥ ३२ ॥

छाया वैगुण्य मात्रं तु शङ्के दुःखमुपस्थितम् ।
अदुःखार्हामिमां देवीं वैहायसमुपस्थिताम् ॥ ३३ ॥

अर्थसिद्धिं तु वैदेह्याः पश्याम्यहमुपस्थिताम् ।
राक्षसेन्द्रविनाशं च विजयं राघवस्य च ॥ ३४ ॥

निमित्तभूतमेतत्तु श्रोतुमस्या महत्प्रियम् ।
दृश्यते च स्फुरच्चक्षुः पद्मपत्रमिवायतम् ॥ ३५ ॥

ईषच्च हृषितो वास्या दक्षिणाया ह्यदक्षिणः ।
अकस्मादेव वैदेह्या बाहुरेकः प्रकम्पते ॥ ३६ ॥

करेणुहस्तप्रतिमः सव्यश्चोरुरनुत्तमः ।
वेपन्सूचयतीवास्या राघवं पुरतः स्थितम् ॥ ३७ ॥

पक्षी च शाखा निलयं प्रविष्टः
पुनः पुनश्चोत्तमसान्त्ववादी ।
सुखागतां वाचमुदीरयाणः
पुनः पुनश्चोदयतीव हृष्टः ॥ ३८ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com